दलेगन्धिः, पुं, ( दले गन्धो यस्य समासान्त इत् । सप्तम्या अलुक् च । ) सप्तपर्णवृक्षः । इति त्रिकाण्डशेषः ॥

दल्भः, पुं, ( दलति विशीर्णो भवत्यनेनेति । दल+"इदलिभ्यां भः ।" उणां । ३ । १५१ । इति भः । ) प्रतारणा । पापम् । मुनिभेदः । इत्युणादिकोषः ॥ चक्रम् । इति सिद्धान्तकौमुदी-उणादिवृत्तिः ॥

दल्मिः, पुं, ( दलति विदारयति असुरानिति । दल+"दल्मिः ।" उणां ।४।४७। इति मिः । ) इन्द्रः । इति हेमचन्द्रः । २ । ८६ ॥ ( दल्यते अनेनेति । ) वज्रम् । इति सिद्धान्तकौमुदी-उणादिवृत्तिः ॥

दव, इ व्रजे । इति कविकल्पद्रुमः ॥ ( भ्वां-परं-सकं-सेट् । ) इ, दन्वति । व्रजो गतिः । इति दुर्गादासः ॥

दवः, पुं, ( दुनोति पीडयतीति । दु+अच् । ) वनम् । वनाग्निः । इत्यमरः । ३ । ३ । २०५ ॥ ( यथा, भागवते । ८ । ६ । १३ ।
"दृष्ट्वा गता निर्वृतिमद्य सर्व्वे
गजा दवार्त्ता इव गाङ्गमम्भः ॥")
अग्निः । इत्यमरटीकायां नीलकण्ठः ॥ ( दु उपतापे+"ऋदोरप् ।"३ । ३ । ५७ । इत्यप् ।) उपतापः । इति केचित् ॥

दवथुः, पुं, ( दवनमिति । टु दु उपतापे+"ट्वितोऽथुच् ।" ३।३।८९ । इति भावे अथुच् ।) परितापः । इति जटाधरः ॥ (यथा, काशीखण्डे । २९ । ८९ ।
"दुरोदरघ्नी दावार्च्चिर्दवघ्न्येकशेवधिः ।
दीनसन्तापशमनी दात्री दवथुवैरिणी ॥"
दूयतेऽनेनेति । करणे अथुच् । ) चक्षुरादिदाहः । इति राजनिर्घण्टः ॥

दवाग्निः, पुं, ( दवानां वनानां अग्निः । यद्वा, दव एवाग्निः । ) दावानलः । इति द्विरूपकोषः ॥ ( यथा, मेघदूते । ५५ ।
"तच्चेद्वायौ सरति सरलस्कन्धसंघट्टजन्मा-
बाधेतोल्का क्षपितचमरीवालभारो दवाग्निः ॥")

दविष्ठः, त्रि, (अयमेषामतिशयेन दूर इति । दूर+इष्ठन् । "स्थूलदूरयुवेति ।"६ । ४ । १५६ । इति रस्य लुप् ऊकारस्य च गुणः । ) सुदूरः । अत्यन्तदूरवर्त्ती । इत्यमरः । ३ । १ । ६९ ॥

दवीयान्, [स्] त्रि, ( इदमनयोरतिशयेन दूरम् । दूर+ईयसुन् । स्थूलदूरेत्यादिना साधुः । ) सुदूरः । इत्यमरः । ३ । १ । ६९ ॥ ( यथा, प्रद्युम्नविजये । २ । १६ ।
"कोऽस्मिन् दवीयांसमपीन्दुबिम्बं
न वेद चूडामणिमिन्दुमौलेः ।
पातालधामानमपि प्रहृष्टं
न वाडवं सुन्दरि ! वेद को वा ॥")

दश, इ क त्विषि । इति कविकल्पद्रुमः ॥ ( चुरां-परं-अकं-सेट् । इ क, दंशयति । त्विषि दीप्तौ । इति दुर्गादासः ॥

दश, इ क ङ दर्शे । दंशने । इति कविकल्पद्रुमः ॥ ( चुरां-आत्मं-सकं-सेट् । ) इ क ङ, दंशयते । दर्शो दर्शनम् । इति दुर्गादासः ॥

दश, [ न् ] त्रि, ( दंशयति दीप्यते इति । दन्शि+बाहुलकात् कनिन् । "दन्श दंशने । न लोपः ।" इत्युज्ज्वलदत्तः । १ । १५६ । ) संख्याविशेषः । द्विगुणितपञ्च १० । (यथा, महाभारते । ३ । १३४ । १७ ।
"दिशो दशोक्ताः पुरुषस्य लोके
सहस्रमाहुर्दशपूर्णं शतानि ।
दशैव मासान् बिभ्रति गर्भवत्यो
दशेरका दश दाशा दशार्हाः ॥")
दशवाचकानि यथा । हस्ताङ्गुलिः १ शम्भुबाहुः २ रावणमस्तकम् ३ कृष्णावतारः ४ दिक् ५ विश्वदेवः ६ अवस्था ७ चन्द्राश्वः ८ पंक्तिः ९ । इति कविकल्पलता ॥ बहुवचनान्तोऽयं शब्दः । तत्संख्याविशिष्टः । इत्यमरः । २ । ६ । ६१ ॥

दशकण्ठः, पुं, ( दश कण्ठा गला यस्य । ) रावणः । इति शब्दरत्नावली ॥ (यथा, रघुः । ८ । २९ ।
"दशपूर्व्वरथं यमाख्यया
दशकण्ठारिगुरुं विदुर्बुधाः ॥")

दशकन्धजित्, पुं, ( दशकन्धं रावणं जयतीति । जि+क्विप् तुक् च । ) रामः । इति त्रिकाण्डशेषः ॥

दशकन्धरः, पुं, (दश कन्धरा ग्रीवा यस्य ।) रावणः । इति हेमचन्द्रः । ३ । ३७० ॥ (यथा, भागवते । २ । ७ । २३ ।
"अस्मत्प्रसादसुमुखः कलया कलेश
इक्ष्वाकुवंश अवतीर्य गुरोर्निदेशे ।
तिष्ठन् वनं सदयितानुज आविवेश
यस्मिन् विरुध्य दशकन्धर आर्त्तिमार्च्छत् ॥")

दशग्रीवः, पुं, ( दश ग्रीवा यस्य । ) रावणः । इति शब्दमाला ॥ (यथा, महाभारते । ३।२७४।१० ।
"दशग्रीवस्तु सर्व्वेषां श्रेष्ठो राक्षसपुङ्गवः ।
महोत्साहो महावीर्य्यो महासत्त्वपराक्रमः ॥")
एकादशमन्वन्तरीयदशनामकेन्द्रशत्रुविशेषः । यथा,—
"रुद्रपुत्त्रस्य ते पुत्त्रान् वक्ष्याम्येकादशस्य तु ।
सर्व्वगः सुशर्म्मा च देवानीकः पुरुर्गुरुः ॥
,क्षत्त्रवर्द्धा दृढायुश्च आर्द्रकः पुत्त्रकस्तथा ।
हविष्मांश्च हविष्यश्च वरुणो विश्वविस्तरः ॥
विष्णुश्चैवाग्नितेजाश्च ऋषयः सप्त कीर्त्तिताः ।
विहङ्गमाः कामगमा निर्म्माणरुचयस्तथा ॥
एकैकस्त्रिंशकास्तेषां गणाश्चेन्द्रश्च वै वृषः ।
दशग्रीवो रिपुस्तस्य स्त्रीरूपी घातयिष्यति ॥"
इति गरुडे ८७ अध्यायः ॥
(असुरविशेषः । यथा महाभारते ।२।९।१४।
"दशग्रीवश्च वाली च मेघवासा दशावरः ॥"
दमघोषस्य पुत्त्रविशेषः । यथा, हरिवंशे । ११६ । २२ ।
"दमघोषस्य पुत्त्रास्तु पञ्च भीमपराक्रमाः ।
भगिन्यां वासुदेवस्य श्रुतश्रवसि जज्ञिरे ।
शिशुपालो दशग्रीवो रैभ्योऽथोपदिशो बली ॥" ।

दशतिः, स्त्री, ( दशावृत्ता दश । निपातनात् साधुः । ) शतम् । इति महाभारते दानधर्म्मः ॥ ( यथा, महाभारते । १ । १६ । १३ ।
"कालेन महता कद्रुरण्डानां दशतीर्दश ।
जनयामास विप्रेन्द्र ! द्वे चाण्डे विनता तथा ॥"
"यथा नव दशावृत्ता नवतिस्तथा दश दशावृत्ता दशतिः शतमित्यर्थः । दश दशतीर्दशशतानीत्यर्थः ॥" इति तत्र नीलकण्ठः ॥ )

दशधा, व, ( दशानां प्रकारः । दश+"संख्याया विधार्थे धा ।" ५ । ३ । ४२ । इति धा । ) दश प्रकारम् । इति व्याकरणम् ॥ ( यथा, मनुः । ९ । १५२ ।
"सर्व्वं वा रिक्थजातन्तु दशधा परिकल्प्य च ।
धर्म्म्यं विभागं कुर्व्वीत विधिनानेन धर्म्मवित् ॥")

दशनं, क्ली, (दश्यते इव शरीरमनेनेति । दन्श+करणे ल्युट् । दन्दशेति निर्द्देशात् क्वचित् किल्यपि नलोपः । ) कवचम् । शिखरे, पुं । इति मेदिनी । ने, ७४ ॥

दशनः, पुं, क्ली, ( दश्यतेऽनेनेति । दन्श+ल्युट् । दन्दशेति निर्द्देशात् अत्र अकित्यपि नलोपः । ) दन्तः । इत्यमरभरतौ ॥ ( यथा, रघुः । ५ । ५२ ।
"उवाच वाग्मी दशनप्रभाभिः
संवर्द्धितोरःस्थलतारहारः ॥")

दशनवासः, [स] क्ली, (दशनानां वास इव आच्छादकत्वात् ।) ओष्ठः । इत्यमरः । २ । ६ । ९० ॥

दशनाढ्या, स्त्री, ( दशनः आढ्यो यस्याः । एतत् सेवनेन हि दन्तस्य दार्ढ्यात् अस्य तथात्वम् ।) चुक्रिका । इति शब्दचन्द्रिका ॥

दशनोच्छिष्टः, पुं, निश्वासः । (दशनेन उच्छिष्टः । ) अधरचुम्बनम् । इति मेदिनी । टे, ६३ । दन्तव्यक्ते, त्रि ॥

दशपारमिताधरः, पुं, बुद्धः । इति हेमचन्द्रः । २ । १४७ ॥

दशपुरं, क्ली, ( दश दिशः पिपर्त्तीति । पृ+कः । ) कैवर्त्तीमुस्तकम् । इत्यमरः । २ । ४ । १३१ ॥ ( दश पुरो यत्र । "ऋक्पूरब्धूःपथामानक्षे ।" ५ । ४ । ७४ । इति अः । ) देशभेदः । स मालवदेशैकखण्डः । पुरभेदः । इति मेदिनी । रे, २६६ ॥ ( यथा, मेघदूते । ४९ ।
"कुन्दक्षेपानुगमधुकरश्रीमुषामात्मबिम्बं
पात्रीकुर्व्वन् दशपुरवधूनेत्रकौतूहलानाम् ॥")

दशपूरम् क्ली, ( दश दिशः पूरयतीति । पूर+अच् । ) दशपुरम् । इत्यमरटीकायां भरतः ॥

दशबलः, पुं, ( दशसु दिक्षु बलं यस्य । यद्वा,
"दानशीलक्षमावीर्य्यध्यानप्रज्ञा बलानि च ।